# वृद्धिरेचि ६।१।८५

सूत्रमिदं सिद्धान्तकौमुद्याः अच्-सन्धिप्रकरणे प्राप्यते। सूत्रस्यास्य वृत्तौ भट्टोजिदीक्षितमहाभागेन तदीये सिद्धान्तकौमुदीग्रन्थे उक्तम्- "अवर्णादेचि परे वृद्धिरेकादेशः स्यात्। गुणापवादः।" इति।

विधिसूत्रमेतद्। अस्मिन् पदद्वयमस्ति। वृद्धिः एचि इति सूत्रगतपदच्छेदः। वृद्धिरिति प्रथमैकवचनान्तपदं एचीति सप्तम्येकवचनान्तपदम्। "आद् गुणः" इति सूत्रात् 'आदिति पञ्चम्येकवचनान्तं पदमनुवर्तते। "एकः पूर्वपरयोः" इत्यधिकृतम्। पूर्वस्य परस्य चेति द्वयोः स्थाने एकः एव आदेशो भवतीति तदर्थः। अवर्णाद् एचि परे पूर्वपरयोः स्थाने एको वृद्धिः आदेशो भवतीति सूत्रार्थः।

"आद् गुणः" इति सूत्रेण अवर्णाद् अचि परे गुणो विहितः। "वृद्धिरेचि" इति सूत्रेण 'अवर्णाद् एचि परे वृद्धिः विहिता। अवर्णाद् एचि परे इदं सूत्रद्वयमपि कार्याय प्रवर्तेत। तदा केन सूत्रेण कार्यं कर्तव्यमिति प्रश्नो जायते। यदि सर्वत्र "आद् गुणः" इति सूत्रं प्रवर्तेत तदा "वृद्धिरेचि" इति सूत्रस्य प्रवृत्त्यर्थं क्षेत्रं नावशिष्यते। तदा "वृद्धिरेचि" इति सूत्रं व्यर्थतामापद्येत। परन्तु भगवतः पाणिनेः किमपि वचनं न व्यर्थम्। अतो 'वृद्धिरेचि' इति सूत्रस्य यावद् लक्ष्यं तावत् सर्वमपि तस्यैव अस्तु। तस्य लक्ष्ये "आद् गुणः" इति सूत्रं न प्रवर्तेत। अतो "वृद्धिरेचि" सूत्रं गुणस्यापवादः। गुणः उत्सर्गविधिः भवति, वृद्धिः अपवादो भवति।

सूत्रस्यास्योदाहरणं ~~कृष्णौ~~ कृष्णैकत्वम् इति। कृष्ण एकत्वम् इति स्थितिर्भवति। णकारोत्तरवर्ती यः अकारः, तस्मात् परम् एच् एकत्वशब्दस्य ए-इति वर्णः अस्ति। अतः अ+ए इत्यत्र अवर्णाद् एच्- इति स्थितिरस्ति, तदा अ+ए इति पूर्वपरयोः द्वयोः स्थाने प्रकृतसूत्रेण वृद्धिः (आ ऐ औ) एकादेशः प्राप्नोति। "स्थानेऽन्तरतमः" इति परिभाषाबलात् स्थानकृदान्तर्ये ऐकारे कृष्णैकत्वम् इति रूपम्।

Teacher's Signature 27.8.2020

## एत्येधत्यूठसु ६.१.८९

सूत्रमिदं सिद्धान्तकौमुद्याः अच्-सन्धिप्रकरणे प्रकरणे प्राप्यते। सूत्रस्यास्य वृत्तौ भट्टोजिदीक्षितमहाभागेनोक्तम्- " अवर्णादेजाद्योः एत्येधत्योः ऊठि च परे वृद्धिरेकादेशः स्यात्। पररूपगुणापवादः।" इति।

विधिसूत्रमेतत्। "एत्येधत्यूठसु" इत्येकमेव पदमत्र सूत्रे। तच्च सप्तमीबहुवचनान्तम्। एतिः च एधतिः च ऊठ् च इति एत्येधत्यूठः इतीतरेतरद्वन्द्वः। तेषु एत्येधत्यूठसु इति। अत्र इण्-गतौ एध-वृद्धौ इति धातुः स्तः। तयोः श्तिप्-प्रत्यययोगेन एतिः एधतिः इति शब्दौ निष्पद्येते। "आद् गुणः" इति सूत्रात् आत् इति पञ्चम्यन्तं पदमनुवर्तते। वृद्धिरेचि सूत्राद् वृद्धिः एचि इति पदद्वयमप्यनुवर्तते। एकः पूर्वपरयोरिति अधिकृतम्। पूर्वस्य परस्य चेति द्वयोः स्थाने एक एव आदेशो भवतीति तदर्थः। सूत्रार्थो भवति- अवर्णाद् एजाद्योः एत्येधत्योः ऊठि च परे पूर्वपरयोः स्थाने वृद्धिः एकादेशो भवतीति। अर्थात् अवर्णात् परम् एजादिः अर्थात् यस्यादिः वर्णः एच्-प्रत्याहारस्थः अस्ति तादृशः इण् धातुः, एध्-धातुश्च यदि स्याद् अथवा ऊठ् स्यात् तर्हि पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवतीति।

सूत्रस्यास्य उपैति इत्युदाहरणम्। इण्-धातोः प्रथमपुरुषैकवचने एति इति रूपम्। उप इति उपसर्गयोगेन उप एति इति स्थितिः। धातूपसर्गयोः संहिता अनिवार्या। अत्र अवर्णात् परम् एजादिः अर्थात् एकारादिः इण्-धातुः अस्ति। तदा अ+ए इति पूर्वपरयोः स्थाने "एङि पररूपम्" इति सूत्रेण पररूपे प्राप्ते "एत्येधत्यूठसु" इति सूत्रेण वृद्धिर्विधीयते। तत्र अ+ए इति अनयोः स्थाने "स्थानेऽन्तरतमः" इति परिभाषाबलेन कण्ठतालुस्थानजन्यत्वधर्मेण अन्यतमः ऐकारो भवति। तदा उपैति इति रूपं सिद्ध्यति। समीपं गच्छतीति तदर्थः।

Teacher's Signature गौतमः
२३.३.२०२०

Scanned by CamScanner

Jogmaya
Page No. | Date

## एङि पररूपम् ६.१.९१

सूत्रमिदं सिद्धान्तकौमुद्याः अच्-सन्धिप्रकरणे प्राप्यते, सूत्रस्यास्य वृत्तौ भट्टोजिदीक्षितमहाभागेनोक्तम्– "अवर्णान्तादुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात्।" इति।

विधिसूत्रमिदम्। अस्मिन् सूत्रे द्वे पदे स्तः। एङि इति सप्तम्यन्तं रूपम्, परस्य रूपं पररूपमिति षष्ठीतत्पुरुषसमासः। पूर्ववर्णः पररूपेण अवशिष्यते इति पररूपशब्दस्यार्थः। "आद् गुणः" इति सूत्रात् आत् इति पञ्चम्यन्तं पदमनुवर्तते। "उपसर्गाद्वृति धातौ" इति सूत्रात् उपसर्गात् इति पञ्चम्यन्तं धातौ इति सप्तम्येकवचनान्तं चेति पदद्वयमनुवर्तते। एकः पूर्वपरयोः इति अधिकृतम्, पूर्वस्य परस्य चेति द्वयोः स्थाने एको एव आदेशो भवतीति तदर्थः।

अ+ए (प्र+एजते) इति स्थिते वस्तुतः "वृद्धिरेचि" इति सूत्रेण वृद्धिः प्राप्नोति। अतः अयं विधिः "वृद्धिरेचि" इत्यस्य योगस्यापवादः। अवर्णात् एङादिः इण् एध् वा धातुः यदि स्यात् तर्हि "एङि पररूपम्" इति सूत्रेण प्राप्ते "एत्येधत्यूठ्सु" इति सूत्रेण वृद्धिर्भवति। अतः "एङि पररूपम्" इति रूपम् "एत्येधत्यूठ्सु" इति सूत्रस्यापि अपवादः।

"प्रेजते" इति सूत्रस्योदाहरणम्। प्र एजते इत्यत्र अवर्णान्तः उपसर्गः प्र अस्ति। ततः परम् एङादिः धातुः एजते इति अस्ति। "वृद्धिरेचि" इति सूत्रेण वृद्धौ प्राप्तायाम् "एङि पररूपम्" इति सूत्रेण वृद्धेरपवादो भवति। किञ्च, प्र-उपसर्गस्य अकारस्य एकारस्य च स्थाने पररूपं भवति, अर्थात् अकारः एकाररूपेण अवशिष्यते। तदा प्रेजते इति रूपं सिध्यति। प्रकर्षेण दीप्यति इति तदर्थः।

Teacher's Signature 27.03.2020

## अकः सवर्णे दीर्घः ६.१.१७

सूत्रमिदं भट्टोजिदीक्षितमहाभागेन सिद्धान्तकौमुद्याः अच्-सन्धिप्रकरणे उल्लिखितम्। सूत्रस्यास्य वृत्तौ दीक्षितेनोक्तम्— " अकः सवर्णे अचि परे दीर्घ एकादेशः स्यात् " इति।

विधिसूत्रमिदम्। अस्मिन् त्रीणि पदानि सन्ति। अकः सवर्णे दीर्घः इति सूत्रगत पद-च्छेदः। " इको यणचि " इति सूत्रात् अचि इति ~~पद~~ सप्तम्यन्तं पदम् अनुवर्तते। " एकः पूर्वपरयोः " इत्यधिकृतम्। पूर्वस्य परस्य चेति द्वयोः स्थाने एक एव आदेशो भवतीति तदर्थः। सूत्रार्थो भवति अकः सवर्णे अचि परे पूर्वपरयोः स्थाने दीर्घ एकादेशो भवति। अकः परम् अच् वस्तुतः अक् एव भवति। अतः अर्थो भवति अ इ उ ऋ लृ इत्येतेभ्यो वर्णेभ्यः परं यदि सवर्णाः अ इ उ ऋ लृ वर्णाः स्युः तर्हि पूर्वपरयोः स्थाने दीर्घ एकादेशो भवति।

प्रस्तुतेऽस्मिन् सूत्रे " इको यणचि " इति सूत्रात् अचि इति पदमनुवर्तते। अस्य प्रयोजनं जिज्ञासिते दीक्षितेन प्रत्युदाहृतं कुमारी शेते इति। अतः अनुवृत्त्यभावात् अस्मिन् स्थले (कुमारी शेते) ई-कारशकारयोः दीर्घादेशः स्यात्। किन्तु अचीति पदस्य ग्रहणेन अत्र दीर्घादेशो न प्राप्नोति, यतः शकारो न अच् किन्तु हल्-वर्णः।

अस्य सूत्रस्योदाहरणं हि दैत्यारिः। दैत्यानाम् अरिः। समासेकृते दैत्य अरिः इति स्थिते। तत्र दैत्य इत्यत्र यकारोत्तरः अकारः तस्मात् परं सवर्णः अच् अरिः इत्यस्य अकारोऽस्ति। " आद् गुणः " इति सूत्रेण गुणे प्राप्ते प्रकृतसूत्रेण पूर्वपरयोः अकाराकारयोः स्थले ' स्थानेऽन्तरतमः ' इति परिभाषाबलात् स्थानत आन्तर्यात् आकाररूपो दीर्घैकादेशे दैत्यारिः इति रूपम् इति शम्।

Teacher's Signature गौतमः
23.3.2020

## एङः पदान्तादति ६.१.१०५

सूत्रमिदं भट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्याम् अच्-सन्धिप्रकरणे प्राप्यते। सूत्रस्यास्य वृत्तौ भट्टोजिदीक्षितमहाभागेनोक्तम्- "पदान्तादेङः अति परे पूर्वरूपमेकादेशः स्यात्।" इति।

विधिसूत्रमिदम्। अस्मिन् त्रीणि पदानि सन्ति। एङः पदान्तात् अति इति सूत्रगतपदच्छेदः। एङः इति पञ्चम्येकवचनान्तं पदम्, पदस्य अन्तः पदान्तः इति षष्ठीतत्पुरुषसमासः, तस्मात् पदान्तादिति पञ्चम्येकवचनम्, अति इति सप्तम्येकवचने रूपम्। तपरस्तत्कालस्येति सूत्रेण एकमात्रिकः अकारो बोध्यः। "अमि पूर्वः" इति सूत्राद् पूर्वः इति पदमनुवर्तते। "एकः पूर्वपरयोः" इत्यधिकृतम्। पूर्वस्य परस्य चेति द्वयोः स्थाने एक एवादेशो भवतीति तदर्थः। पदयोजना- पदन्ताद् एङः अति पूर्वपरयोः एकः पूर्वो भवति। सूत्रार्थो भवति- पदान्ताद् एङः अति परे पूर्वपरयोः स्थाने पूर्वरूपम् एकादेशो भवति। "एचोऽयवायावः" इति सूत्रस्य अयं योगः अपवादः।

हरेऽव इति सूत्रस्योदाहरणम्। हरिशब्दस्य सम्बोधने हरे इति रूपम्। अव्-धातोर्लोटि मध्यमपुरुषे रूपम् अव इति। हरे अव इति वाक्ये स्थिते, रेफात् परं यः एकारः सः अव-शब्दस्य अकारस्य अव्यवहितः पूर्वे अस्ति। तत्र "एचोऽयवायावः" इति सूत्रेण अयादेशे प्राप्ते प्रकृतसूत्रेण पूर्वपरयोः स्थाने पूर्वरूपे कृते हरेऽव इति पदं सम्पद्यते। हे हरे, हे गोविन्द! त्वं रक्ष, पाहीति तदर्थः।

Teacher's Signature 27.03.2020

Scanned by CamScanner